G00644 न. ५०२६

Indira Gandhi National Centre for the Arts

नं १५८

न्कामानवरुंधेयएवंवेदंताअभिसंपद्यंतेबृहतीचविराजंचछं
दांयेतस्याङ्गः संपन्नामथोअनुष्टुभमनुष्टुबायतनानिह्याज्यानि
॥२॥गायत्रंप्रउगंकुर्यादित्याहुस्तेजोवैब्रह्मवर्चसंगायत्रीतेज
स्वीब्रह्मवर्चसीभवतीत्यौष्णिहंप्रउगंकुर्यादित्याहुरायुर्वाउष्णि
गायुष्मान्भवतीत्यानुष्टुभंप्रउगंकुर्यादित्याहुःक्षत्रंवाअनुष्टु
प् क्षत्रस्याप्त्याइतिबार्हतंप्रउगंकुर्यादित्याहुः श्रीर्वैबृहतीश्री
मान्भवतीतिपांक्तंप्रउगंकुर्यादित्याहुरन्नंवैपंक्तिरन्नवान्भवत
तित्रैष्टुभंप्रउगंकुर्यादित्याहुर्वीर्यंवैत्रिष्टुप्वीर्यवान्भवतीतिजा
गतंप्रउगंकुर्यादित्याहुर्जागतावैपशवःपशुमान्भवतीतितदुग

Indira Gandhi National
Centre for the Arts

म धुक स्मवा नर मि श्यो म ध्रु यदा श्वं दति १

आर· ३

यत्रमेवकुर्याद्ब्रह्मवैगायत्रीब्रह्मैतदहंब्रह्मणैवैतन्मधुछंदसोम
धुछंदस्त्वमथो अन्नंवैमधुसर्वंवैमधुसर्वंवैकामामधुतद्यन्मा
धुछंदसंशंसतिसर्वेषांकामानामवरुध्यैसर्वान्कामानवरुंधे
यएवंवेदतद्वैकाहिकंरूपसमृद्धंवहुवाएतस्मिन्नहनिकिंचकिंच
वारणंक्रियतेशांत्याएवैतिवैप्रतिष्ठैकाहःशांत्यामेवतंप्रतिष्ठा
यामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धो
ताशंसति॥३॥वायवायाहिदर्शतेमेसोमाअरंकृताइत्येतद्वाअ
हरहंयजमानायचदेवेभ्यश्चारंहास्माएतदहर्भवतियएवंवेदयेषां
चैवंविद्वानेतद्धोताशंसतींद्रवायूइमेसुताआयातमुपनिष्कृतमि ३

ग्र०सं०आ०सं० २०० ०७

तिंयद्वैनिष्कृतंतत्संस्कृतमाहास्येंद्रवायूसंस्कृतंगच्छतोयएवंवेद
येषांचैवंविद्वानेतद्धोताशंसतिमित्रंहुवेपूतदक्षंधियंघृताचीं
साधंतेतिवाग्वैधीर्घृताचीवाचमेवास्मिंस्तद्दधातियएवंवेदयेषां
चैवंविद्वानेतद्धोताशंसत्यश्विनायज्वरीरिषइत्यन्नंवाइषोन्ना
द्यस्यावरुध्याआयातंरुद्रवर्तनीइत्याहास्याश्विनौयज्ञंगच्छतो
यएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतींद्रायाहिचित्रभानविं
द्रायाहिधियेषितइंद्रायाहितूतुजानइत्यायाह्यायाहीतिशंस
त्याहास्येंद्रोयज्ञंगच्छतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंस
त्योमासश्चर्षणीधृतोविश्वेदेवासआगतेत्याहास्यविश्वेदेवा

Indira Gandhi National Centre for the Arts

आर. ४

हवंगछंतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिदाश्वांसोदा
शुषःसुतमितियदाहददुषोददुषःसुतमित्येवतदाहददतिहास्मै
तंकामंदेवायत्कामएतछंसतियएवंवेदयेषांचैवंविद्वानेतद्धोता
शंसतिपावकानःसरस्वतीयज्ञंवष्टुधियावसुरितिवाग्वैधियाव
सुर्वाचमेवास्मिंस्तद्दधातियएवंवेदयेषांचैवंविद्वानेतद्धोताशंस
तियज्ञंवष्ट्वितियदाहयज्ञंवहत्वित्येवतदाहताःपराग्वचनेनैकविं
शतिर्भवंत्येकविंशोयंपुरुषोदशहस्त्याअंगुलयोदशपाद्याआत्मै
कविंशस्तमिममात्मानमेकविंशंसंस्कुरुतेनास्त्रिःप्रथमयात्रिरुत्त
मयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दश ४

हस्त्याअंगुलयोदशपाद्याद्वाऊरूद्वौबाहूआत्मैवपंचविंशस्त
मिममात्मानंपंचविंशंसंस्कुरुतेथोपंचविंशोवाएतदहःपंचविंशए
तस्याह्नस्तोमस्तत्समेनसमंप्रतिपद्यंतेतस्माद्वेएवपंचविंशति
र्भवंतिभवंति॥४॥ इत्यारण्यकेप्रथमोध्यायः॥ ॥आत्वा
रथंयथोतयइदंवसोसुतमंधइतिमरुत्वतीयस्यप्रतिपदनुच
रौवैकाहिकौरूपसमृद्धौबहुवाएतस्मिन्नहनिकिंचकिंचवारुणं
क्रियतेशांत्याएवंशांतिर्वैप्रतिष्ठैकाहःशांत्यामेवतत्प्रतिष्ठायामं
ततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशं
सतींद्रनेदीयएदिहिप्रसृतिराशाचीभिर्येतउछिनइत्युक्थंवाएत

Indira Gandhi National
Centre for the Arts

मुनि ब्रह्मणस्पते सुवीर्यमिति वीर्यवद्रूपसमृद्धमेतस्या
ह्नो रूपं २

आर
५
रहेरुक्थवद्रूपसमृद्धमेतस्याह्नोरूपंप्रैतुब्रह्मणस्पतिरच्छावीरमि
तिवीरवद्रूपसमृद्धमेतस्याह्नोरूपंप्रनूनंब्रह्मणस्पतिर्मंत्रंवदत्युं
क्थ्य क्थ्य मित्यु वाएतदहरुक्थवद्रूपसमृद्धमेतस्याह्नोरूपमग्नि
र्नेतासवृत्रहेतिवार्त्रघ्नमिंद्ररूपमैंद्रमेतदहरेतस्याह्नोरूपंत्वं
सोमक्रतुभिःसुक्रतुर्भूस्त्वंवृषावृषत्वेभिर्महित्वेतिवृषण्वद्वाइंद्र
स्यरूपमैंद्रमेतदहरेतस्याह्नोरूपंपिन्वंत्यपोत्यन्नमिहेविनयंति
वाजिनमितिवाजिमद्वाइंद्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपं
मथोउत्संदुहंतिस्तनयंतमक्षितमितिस्तनयद्वाइंद्रस्यरूपमैं
द्रमेतदहरेतस्याह्नोरूपंप्रवइंद्रायबृहतइतिंयद्वैबृहत्तन्मह ५

न्महद्वद्रूपसमृद्धमेतस्याह्नोरूपंबृहदिंद्रायगायतेतियद्वैबृहत्त
न्महद्वैन्महद्वद्रूपसमृद्धमेतस्याह्नोरूपंनकिःसुदासोरथंपर्या
सनरीरमदितिपर्यस्तवद्रांतिमद्रूपसमृद्धमेतस्याह्नोरूपंसर्वा
न्प्रगाथांछंसतिसर्वेषामह्नामाप्त्यैसर्वेषामुक्थानांसर्वेषांपृष्ठा
नांसर्वेषांशस्त्राणांसर्वेषांप्रउगाणांसर्वेषांसवनानां॥५॥अस
त्सुमेजरितःसाभिवेगःसत्यध्वृतमितिशंसतिसत्यंवाएतदहःस
त्यवद्रूपसमृद्धमेतस्याह्नोरूपंतद्वासुक्रंब्रह्मवैवसुक्रोब्रह्मैत
दहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यंतेतदाहुरथकस्माद्वासुक्रेणैतन्म
रुत्वतीयंप्रतिपद्यतइतिनहवाएतदन्योवसुक्रान्मरुत्वतीयमु

Indira Gandhi National
Centre for the Arts

आर॰
६

द्यछन्नविव्याचेतितस्माद्वासुक्रेणैवतन्मरुत्वतीयंप्रतिपद्यतेतद
निरुक्तंप्राजापत्यंशंसत्यनिरुक्तोवैप्रजापतिःप्रजापतेराप्त्यैसक
दिंद्रंनिराहेतिनैंद्राद्रूपान्नप्रच्यवतेपिबासोममभिययुग्रतर्दइतिशं
सत्यूर्वंगव्यंमहिगृणानइंद्रेतिमहद्वद्रूपसमृद्धमेतस्याह्नोरूपंतदु
भारद्वाजंभरद्वाजोहवाऋषीणामनूचानतमोदीर्घजीवितमस्तप
स्वितमआससएतेनसूक्तेनपाप्मानमपाहततद्यद्भारद्वाजंशंसति
पाप्मनोपहत्याअनूचानोदीर्घजीवीतपस्व्यसानीतितस्माद्भारद्वा
जंशंसतिकयाशुभासवयसःसनीळाइतिशंसत्याशसतेप्रति
हर्यत्युक्थं त्युक्थंवाएतदहरुक्थवद्रूपसमृद्धमेतस्याह्नोरूपंत ६

दुकयाशुभीयमेतद्वैसंज्ञानंसंतनिसूक्तंयत्कयाशुभीयमेतेनह
वाइंद्रोअगस्त्योमरुतस्तेसमजानततद्यत्कयाशुभीयंशंसतिसंज्ञा
त्याएवतद्वायुष्यंतद्योस्यप्रियस्यात्कुर्यादेवास्यकयाशुभीयंमरु
त्वांइंद्रवृषभोरणायेतिशंसतींद्रवृषभइतिवृषण्वद्वाइंद्रस्यरूपमैंद्र
मेतदहरेतस्याह्नोरूपंतदुवैश्वामित्रंविश्वस्यहवैमित्रंविश्वामित्रआ
सविश्वंहास्मैमित्रंभवतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिज
निष्ठाउग्रःसहसेतुरायेतिनिविद्धानमेकाहिकंरूपसमृद्धंबहुवाए
तस्मिन्नहनिकिंचकिंचवारुणंक्रियतेशांत्याएवशांतिर्वैप्रतिष्ठैकाहः
शांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदय

Indira Gandhi National
Centre for the Arts

आर॰
७

षांचैवंविद्वानेतद्धोताशंसतिनाःपराग्वचनेनैसप्तनवतिर्भवंतिसाया
नवतिस्त्रिस्त्रस्तास्त्रिंशिन्योविराजोपयाःसप्तातियंतियैवैषाप्रशंसा
सास्यस्यतस्याएवतास्त्रिःप्रथमयात्रिरुत्तमयैकशतंभवंतिपंचांगु
ल्यंश्चतुष्पर्वाद्दिकक्षसीदोश्चाक्षश्चांसफलकंचसापंचविंशतिः
पंचविंशानीतराणिह्यंगानिनछतमात्मैकशततमोयछतेनदायु
रिंद्रियंवीर्यंतेजोयजमानएकशततमंआयुषींद्रियेवीर्येतेजसिप्र
तिष्ठितेस्तास्त्रिष्टुभमभिसंपद्यंतेत्रैष्टुभोहिमध्यंदिनः॥६॥तदाहुः
किंप्रेंखस्यप्रेंखत्वमित्ययंवैप्रेंखोयोयंपवतएषह्येषुलोकेषुप्रेंखत
इतितत्प्रेंखस्यप्रेंखत्वमेकंफलकंस्यादित्याहुरेकधाह्येवायंवायुःप ७

वतेस्यरूपेणेतितत्नादृत्यंत्रीणिफलकानिस्युरित्याहुस्त्रयोवा
इमेत्रिवृतोलोकाएषांरूपेणेतितत्नादृत्यंद्वेएवस्यातांद्वौवाइमौ
लोकावद्धातमाविवदृश्येतेयउएनेअंतरेणाकाशःसोंतरिक्षलो
कस्तस्माद्वेएवस्यातामौदुंबरेस्यातांमूर्ग्वाअन्नाद्यमुदुंबरऊर्जो
न्नाद्यस्यावरुध्यैमध्यतउन्नतेस्यातांमध्यतोवैप्रजाअन्नंधि
नोतिमध्यतएवतदन्नाद्यस्ययजमानंदधात्युभय्योरज्जवोभवं
तिदक्षिणाश्चसव्याश्चदक्षिणावाएकेषांपशूनांरज्जवःसव्याए
केषांतद्यदुभय्योरज्जवोभवंत्युभयेषांपशूनामाप्त्यैदार्भ्यःस्युर्दर्भो
वाओषधीनामपहतपाप्मातस्माद्दार्भ्यःस्युः॥७॥अरत्निमात्रउ

Indira Gandhi National
Centre for the Arts

आ॰र॰ ८ परिभूमेः प्रेंखस्यादित्याहुरेतावता वै स्वर्गा लोकाः संमिता इति न
तन्नादृत्यं प्रादेशमात्रे स्यादित्याहुरेतावता वै प्राणाः संमिता इति
तन्नादृत्यं मुष्टिमात्रे स्यादेतावता वै सर्वमन्नाद्यं क्रियत एतावता
सर्वमन्नाद्यमभिपन्नं तस्मान्मुष्टिमात्र एव स्यात्पुरस्तात्प्रत्यं
चं प्रेंखमधिरोहेदित्याहुरेतस्य रूपेण य एष तपति पुरस्ताद्ध्येष इमां
ल्लोकान्प्रत्यङ्ङधिरोहतीति तन्नादृत्यं तिर्यंचमधिरोहेदित्याहु
स्तिर्यंचं वा अश्वमधिरोहंति तेनो सर्वान्कामानवाप्नवामेति तन्ना
दृत्यमन्वंचमधिरोहेदित्याहुरन्वंचीं वै नावमधिरोहंति नौर्वैषा स्वर्ग
त पाणीयत्प्रेंख इति तस्मादन्वंचमेवाधिरोहेच्छुबुकेनोपस्पृशेच्छुबुको है ८

वै वृक्षमधिरोहति स उ वयसामन्नादतम इति तस्माच्छुबुकेनोपस्पृशे
द्बाहुभ्यामधिरोहेदेवं श्येनो वयांस्यभिनिविशत एवं वृक्षं स उ वय
सां वीर्यवत्तम इति तस्माद्बाहुभ्यामधिरोहेदस्यै पादं नो च्छिंद्यान्ने
दस्यै प्रतिष्ठाया उच्छिद्या इति प्रेंखं होताधिरोहत्यौदुंबरीमासंदीमु
द्गाता वृषा वै प्रेंखो योषासंदी तन्मिथुनं मिथुनमेव तदुक्थमुखे करो
ति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद प्राण्यन्नं वै प्रेंखः श्रीरा
संद्यन्नं चैव तच्छ्रियं चान्वधिरोहतो बृसीर्होत्रकाः समधिरोहंति
सब्रह्मकाः समुत्सर्प्यवा ओषधिवनस्पतयः फलं गृह्णंतीति नद्यदेत
स्मिन्नहनि सर्वशः समधिरोहंतीषमेव तदूर्जमन्नाद्यमधिरोहंत्यू

Indira Gandhi National
Centre for the Arts

आर.
५

र्जान्नाद्यस्यावरुध्यै वषट्कृत्यावरोहेदित्याहुस्तत्तन्नादृत्यमकृता
वै सापचितिर्यामपश्यते करोति निगृह्य भक्षमवरोहेदित्याहुस्त
त्तन्नादृत्यमकृता वै सापचितिर्यामध्यूढाय करोति प्रतिख्याय भ
क्षमवरोहेदेषा वा अपचितिर्यां पश्यते करोति तस्मात्प्रतिख्यायै
व भक्षमवरोहेत्स्थाणुं वरोहेत्स्थाग्वेदेव रेत संप्रजायते तस्मात्स्थाणुं व
रोहेदवरोहेत्॥८॥ इत्यारण्यके द्वितीयोध्यायः॥ ॥ हिंकारेणै
तदहः प्रतिपद्येतेत्याहुर्ब्रह्म वै हिंकारो ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्र
तिपद्यते य एवं वेद यदेव हिंकारेण प्रतिपद्यता३ई॥ हेषा वै हिंकारो
योषर्क्तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै प्रजायते प्र ५

जया पशुभिर्य एवं वेद यद्वेव हिंकारेण प्रतिपद्यता३ई॥ यथा वा अभ्रि
रेवं ब्रह्मणो हिंकारो यद्वै किं चाभ्रियाभितित्सत्यभ्येवैनत्तृणत्त्येवं
यं कामं कामयते हिंकारेणाभ्येवैनत्तृणत्ति य एवं वेद यद्वेव हिंका
रेण प्रतिपद्यता३ई॥ वाचो वा एषा व्यावृत्तिर्दैव्यै च मानुष्यै च यद्धिं
कारः स यद्धिंकृत्य प्रतिपद्यते वाचमेव तद्व्यावर्तयति दैवी च मानु
षीं च॥ ॥ तदाहुः कैतस्याह्नः प्रतिपदिति मनश्च वाक्चेति ब्रूयात्स
र्वेन्यस्मिन्कामाः श्रिताः सर्वानन्याकामान्दुहे मनसि वै सर्वे कामाः श्रि
ता मनसा हि सर्वान्कामान्ध्यायति सर्वे हास्मिन्कामाः श्रयन्ते य एवं
वेद वाग्वै सर्वान्कामान्दुहे वाचा हि सर्वान्कामान्वदति सर्वान्हास्मै

आर०
१०

कामान्वाग्दुहेय एवं वेद तदाहुर्नैतद्दृह ऋचा न यजुषा न साम्नो प्रत्यक्षा
त्प्रतिपद्येतेन नर्चा न यजुषा न साम्न इत्यादिति तदेता एव व्याहृतीः पुर
स्तात्प्रपद्येत भूर्भुवस्वरित्येता वाव व्याहृतयः इमे त्रयो वेदा भूरित्येव ऋ
ग्वेदो भुव इति यजुर्वेदः स्वरिति सामवेदस्तन्नर्चा न यजुषा न साम्ना
प्रत्यक्षात्प्रतिपद्यतेनर्चा न यजुषा न साम्न एति॥ १०॥ तदिति प्रति
पद्यतैतन्नदिति वा अन्नमन्नमेव तदभिप्रतिपद्यत एतां वाव प्रजाप
तिः प्रथमो वाचं व्याहरदेकाक्षर द्व्यक्षरां ततेति ताततेति तथैवैत
त्कुमारः प्रथमवादी वाचं व्याहरत्येकाक्षर द्व्यक्षरां ततेति ताततेति
तथैवैतत्तत एतत्या वाचा प्रतिप्रतिपद्यते तदुक्तमृषिणा बृहस्पते प्र १०

थमं वाचो अग्रमित्येतद्ध्येव प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं
दधाना इति वाचा हि नामधेयानि धीयन्ते यदेषां श्रेष्ठं यदरिप्रमा
सीदित्येतद्ध्येव श्रेष्ठमेतदरिप्रं प्रेणा तदेषां निहितं गुहाविरिती
दमु ह गुहाध्यात्ममिमा देवता अद उ आविरधिदैवतमित्येतन्नदु
क्तं भवति॥ ११॥ तदिदास भुवनेषु ज्येष्ठमिति प्रतिपद्यत एतद्वाव
भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्ण इत्यतो ह्येष जात उग्रस्त्वे
षनृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति सद्यो ह्येष जातः पाप्मा
यं न मपाहतानु विश्वे मदन्त्यूमा इति भूतानि वै विश्व ऊमास्त एनम
नु मदन्त्युदगादुदगादिति वा दधानः शवसा भूर्योजा इत्येष वै वा

Indira Gandhi National
Centre for the Arts

आर० वृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधातीति सर्वं ह्येतस्मा
११ द्बिभाय व्यनच्च व्यनच्च सस्नीति यच्च प्राणि यच्चाप्राणकमित्येव तदा
ह संतेनवं तप्रभृता मदेष्विति तव सर्वं वश इत्येव तदाह तेऋतुमपि वृं
जंति विश्वइति त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे क्र
तवोपि वृंजंतीत्येव तदाह द्विर्यदेते त्रिर्नवंत्सूमा इति द्वौ वै संतौ मि
थुनौ प्रजायेते प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद स्वादोः
स्वादीयः स्वादुना सृजा समिति मिथुनं वै स्वादु प्रजा स्वादु मिथुनेनै
व तत्प्रजां संसृजत्सदः सुमधु मधुनाभियोधीरिति मिथुनं वै मधु
प्रजा मधु मिथुनेनैव तत्प्रजामभियुध्यति तदुक्तमृषिणा स्वांय ११

नं तन्वामैरयते त्यस्यां शारीरीमिमां छंदोमयीमित्येव तदाहा
थो तनूरेव तन्वो अस्तु भेषजमित्यस्यै शारीरी इयं छंदोमयीत्ये
व तदाह तस्यै यान्यष्टावक्षराणि सा गायत्री यान्येकादश सा त्रि
सा ष्टुप्यानि द्वादश जगत्येषयानि दश सा विराडेदशिन्येषु त्रिषु
छंदःसु प्रतिष्ठिता पुरुष इति त्र्यक्षरैः स उ विराज्येतानि वाव सर्वाणि
छंदांसि यान्येतानि विराट् चतुर्थान्येवमु है वैवं विदुष एतदहः स
र्वैश्छंदोभिः प्रतिपन्नं भवति ॥ १२ ॥ तानदेन विहरति पुरुषो वैनदः
स्तस्मात्पुरुषो वरन्सर्वःसन्नदतीवनदं व ओदतीनामितीश्च आ
पो वा ओदत्यो या दिव्या स्ताहीदं सर्वमुदंत्यापो वा ओदत्यो यामुख्या

आर० १२

स्ताहीदं सर्वमन्नाद्यमुदंतिं नदं योयुवती नामिनीं ३। आपो वाव
योयुवत्यो या अंतरिक्ष्यास्ता हि पोप्मूयंन इवापो वाव योयुवत्यो
यास्वेदन्ते ता हि सरीसृप्यंत इवं प्रतिवो अघ्न्या नामितो ३। आपो
वा अघ्न्याया अग्नेर्धूमो ज्ञायंत आपो वा अघ्न्यायाः शिश्नास्त्वस्व
न्त्यंते धेनून्नामिषुध्यसीनीं ३। आपो वाव धेनवस्ता हीदं सर्वं धिन्वं
तीषुध्यसीति यदाहं प तीयसीत्येव तदाह त्रिष्टुभं चानुष्टुभं च वि
हरति वृषा वै त्रिष्टुब्योषानुष्टुप्तन्मिथुनं तस्मादपि पुरुषो जायां
वित्वा कृत्स्नतरमिवात्मानं मन्यते ना त्रिः प्रथमया पंचविंशतिर्भ
वंति पंचविंश आत्मा पंचविंशः प्रजापतिर्दश हस्त्या अंगुलयो द १२

श पाद्यो द्वा ऊरू द्वौ बाहू आत्मैव पंचविंशस्तमिममात्मानं पंचविं
शं संस्कुरुते यो पंचविंशं वा एतदहः पंचविंश एतस्याह्नः स्तोमः स्त
त्समेन समं प्रतिपद्यते तस्माद्द्व एव पंचविंशतिर्भवंति।१४।तदि
ति प्रतिपद्यते तन्नदिति वा अन्नमन्नमेव तदभिप्रतिपद्यत एतां
वाव प्रजापतिः प्रथमां वाचं व्याहरदेकाक्षरद्व्यक्षरां तततिताते
ति तथैवैतत्कुमारः प्रथमवादी वाचं व्याहरत्येकाक्षरद्व्यक्षरां त
ते तिताते तिं तथैवैतत्तन्नवत्या वाचा प्रतिपद्यते तदुक्तमृषिणा बृ
हस्पते प्रथमं वाचो अग्रमित्येतद्ध्येव प्रथमं वाचो अग्रं यत्प्रैरत ना
मधेयं दधाना इति वाचा हि नामधेयानि धीयंते यदेषां श्रेष्ठं यदरि

Indira Gandhi National
Centre for the Arts

आर०
१२

प्रथमासीदित्येतध्येवश्रेष्ठमेतदरिप्रंप्रेणातदेषांनिहितंगुहावि
रितीदमुहगुहाध्यात्ममिमादेवताश्रदउश्राविरधिदैवतमित्येत
तदुक्तंभवति॥१४॥तदिदासभुवनेषुज्येष्ठमितिप्रतिपद्यतेयद्वैज्ये
ष्ठंतन्महन्महदेद्रूपसमृद्धमेतस्याह्नोरूपंतासुतेकीर्त्तिमघवन्महि
त्वेतिमहद्वद्रूपसमृद्धमेतस्याह्नोरूपंभूयइद्वावृधेवीर्यायेतिवी
र्यवद्रूपसमृद्धमेतस्याह्नोरूपंनृणामुत्वानृतमंगीर्भिरुक्थैरित्युक्थ
वाएतदहरुक्थवद्रूपसमृद्धमेतस्याह्नोरूपंन्यूनाक्षरेप्रथमेपदेवि
हरतिन्यूनंवैरेतःसिच्यतेन्यूनेप्राणान्यूनेनाद्यंप्रतिष्ठितमेतेषांका
मानामवरुध्याएतान्कामानवरुंधेयएवंवेदद्वादशाक्षरेभवतउ १३

भयोरंनाद्ययोरुपाप्त्यैयच्चपदद्यच्चापादकमित्यष्टादशाष्टादशा
क्षराणिभवंतियानिदशनवप्राणाआत्मैवदशमःसात्मनःसंस्कृ
तिरष्टावष्टाउद्यंतेश्नुतेयद्यत्कामयतेयएवंवेद॥१५॥तानदेनवि
हरतिप्राणोवैनदस्तस्मात्प्राणोनदंत्सर्वःसन्नदतीवनदंवओदती
नामितीरउष्णिगक्षरैर्भवंत्यनुष्टुप्पादैरायुर्वाउष्णिग्वागनुष्टु
प्तदस्मिन्नायुष्यवाचंचदधातितास्त्रिःप्रथमयापंचविंशतिर्भ
वंतिपंचविंशआत्मापंचविंशःप्रजापति दं
शपाद्यौद्वौ दशहस्त्याअंगुलयोऊ
रूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेथो

Indira Gandhi National
Centre for the Arts

पंचविंशंवाएतदहःपंचविंशएतस्याह्नस्तोमस्तत्समेनसमंप्रति
पद्यंतेतस्माद्वेएवपंचविंशतिर्भवंतीत्यध्यात्मंपंचविंशोथाधिदै
वतंचक्षुःश्रोत्रंमनोवाक्प्राणस्ताएताःपंचदेवताइमंविष्टाःपुरु
षंपंचोहैवैतादेवताअयंविष्टःपुरुषःसोत्रालोमभ्यआनखेभ्यः
सर्वःसंगआप्यतेतस्मात्सर्वाणिभूतान्यापिपीलिकाभ्यआप्ता
न्येवजायंतेतदुक्तमृषिणासहस्रधापंचदशान्युक्थेतिपंचहिदश
तोभवंतियावद्द्यावापृथिवीतावस्तिदित्तियावतीवैद्यावापृथि
वीतावानात्मासहस्रधामहिमानःसहस्रमित्युक्थान्येवतदनुम
दतिमहयतियावद्ब्रह्मविष्ठितंतावतीवागितियत्रह्क्वचब्रह्म १४

तद्वाग्यत्रवावाक्तद्वाब्रह्मेत्येतत्तदुक्तंभवत्येषांवाएषांसूक्तानां
नवर्चंप्रथमंनववैप्राणाःप्राणानांक्लृप्त्यैष चंभवतिषड्वाऋत ऊ२
वऋतूनामाप्त्यैपंचर्चंभवतिपंचपदापंक्तिःपंक्तिर्वाअन्नमन्ना
द्यस्यावरुध्यैत्र्यृचोभवतित्रयोवाइमेत्रिवृतोलोकाएषामेवलो
कानामभिजित्यैताअभिसंपद्यंतेबृहतीछंदोमृतंदेवलोकमेषआ
त्मैवमुहैवैवंविदेतयैवसंपदामृतमेवात्मानभिसंभवतिसंभव
ति॥१६॥ इत्यारण्यकेतृतीयोध्यायः॥ अथसूददोहाःप्राणो
वैसूददोहाःप्राणेनपर्वाणिसंदधात्यथातोग्रीवास्ताआचक्षते
यथाछंदसमुक्षिहइत्यथसूददोहाःप्राणोवैसूददोहाःप्राणेनप

Indira Gandhi National
Centre for the Arts

आ॰
१५

वाणिसंदधात्यथा तःशि
रस्तज्ञायत्रीषुभवत्ययंवैछंदसांगायत्र्यग्रमंगानांशिरस्तदर्कव
तीषुभवत्यग्निर्वाअर्कस्तानवभवंतिनवकपालंवैशिरोदशमी
शंसतिलकेशाइत्येवसाभवत्यथोस्तोमातिशंसनायाएवैतौ
त्रिवृच्चस्तोमौभवतोगायत्रंचछंदएतयोर्वैस्तोमछंदसोःप्रजा
तिमनुसर्वमिदंप्रजायतेयदिदंकिंचप्रजात्यैप्रजायतेप्रजयाप
शुभिर्यएवंवेदाथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणि
संदधात्यथातोविजवस्ताविराजोभवंतितस्मात्पुरुषःपुरुषमा
हविराअस्मात्सुराजेसिंग्रीवावैधारयसीतिस्तभमानंवायद्वा १५

दुनाःसंवाहूतमाःसत्योन्नतमांप्रत्यच्यंतेन्नंहिविराळन्नमुवीर्यम
थसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधाति १७
अथातोदक्षिणःपक्षःसोयंलोकःसोयमग्निःसावाक्तद्रथंतरंस
वसिष्ठस्तच्छंतंतानिषड्वीर्याणिभवंतिसंपातएवकामानामभ्या
प्त्यैप्रतिष्ठित्याअन्नाद्यायपंक्तिरथसूददोहाःप्राणोवैसूददोहाः
प्राणेनपर्वाणिसंदधात्यथातउत्तरःपक्षःसोसौलोकःसोसावा
दित्यस्तन्मनस्तद्बृहत्सभरद्वाजस्तच्छंतंतानिषड्वीर्याणिभवंति
संपातएवकामानामभ्याप्त्यैप्रतिष्ठित्याअन्नाद्यायपंक्तिस्ता
ऊनातिरिक्तौभवतोवृषावैबृहद्योषारथंतरंमतिरिक्तंवैपुंसो

Indira Gandhi National
Centre for the Arts

आर०
१६

न्यूनं स्त्रियै तस्मादूनातिरिक्तौ भवतोऽथो एकेन हैव पत्रेण सुप
र्णः स्योत्तरः पक्षो ज्यायांस्तस्मादेकम्पंचोत्तरः पक्षो भूयान्भवत्य
थ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथातः पुच्छं
ता एकविंशतिर्द्विपदा भवंत्येकविंशतिर्हीमानि प्रत्यंचि सुपर्णस्य प
त्त्राणि भवंत्यथो एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठा पुच्छं वपसा द्वा
विंशीः शंसति प्रतिष्ठयोरेव तद्रूपं क्रियते तस्मात्समाविव वयांसि पु
छेन प्रतितिष्ठंति पुच्छेनैव प्रतिष्ठायो सतं तिप्रतिष्ठा हि पुच्छं स एष
द्वाभ्यां दशिनीभ्यां विराड्भ्यामनयोर्द्वाविंश्योर्द्विपदयोरयं पुरुषः
प्रतिष्ठितस्तस्य यत्सुपर्णरूपं तदस्य कामानामभ्याप्त्या अथ यत्सु १६

रुषरूपं तदस्य श्रियै यशसेऽन्नाद्यायापचित्या अथ सूददोहा अ
थ धाय्याथ सूददोहा वृषा वै सूददोहा योषा धाय्या तदुभयतः सूद
दोहसा धाय्यां परिशंसति तस्माद्द्वयोरेतः सिक्तं सदेकता मेवाप्येति
योषामेवाभ्यतआजानाहि योषातः प्रजानात तस्मादेनामत्र शंसति
१८ गायत्रीत्र्चाशीतिं शंसत्ययं वै लोको गायत्रीत्र्चाशीतिर्य
देवास्मिंल्लोके यशो यन्महो यन्मिथुनं यदन्नाद्यं यापचितिस्तदस्मा वै
तदाप्नवानिं तदवरुणधे तन्म सदित्यथ सूददोहाः प्राणो वै सूददोहाः
प्राणेनेमं लोकं संतनोति बार्हतीत्र्चाशीतिं शंसत्यंतरिक्षलोको वै बा
र्हतीत्र्चाशीतिर्य देवांतरिक्षलोके यशो यन्महो यन्मिथुनं यदन्ना

Indira Gandhi National
Centre for the Arts

आर० १७

यद्देवानां देवं ४

द्यं या पचितिस्तदश्नैवैतदा च्छवानिाा नरदवरुणधैतन्मे सदित्यथ
सूददोहाः प्राणो वै सूददोहाः प्राणेनांतरिक्षलोकं संतनोत्यो स्मिंही
त्वाशीतिं शंसत्य सौ वै लोको द्यौ रो स्मिंही त्वाशीतिर्यद्देवामुष्मिं
ल्लोके यशो यन्महो यन्मिथुनं यदन्ना द्यं या पचिति तं
दश्नैवैतदाप्नवानि तदवरुणधैतन्मे सदित्यथ सूददोहाः प्राणो वै
सूददोहाः प्राणेनामुं लोकं संतनोति संतनोति॥ १९॥ इति प्रथमा
रण्यके चतुर्थोध्यायः॥ ॥ वशं शंसति वशे म इदं सर्वमसदिति
ता एकविंशतिर्भवंत्येकविंशा तिर्हि ता अंतरुदरे विकृतयो योए
कविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठोदरमन्नाद्यानां ता विछंदसो १७

भवंति विक्षुद्रमिव वा अंतस्य मणीय इव च स्थवीय इव चैताः प्राणा
वं छंदस्कारं यथोपपादं शंसति यथोपपादमिव वा अंतस्यं ह्रसी
य इव च द्राघीय इव चाथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वा
णि संदधाति ता मत्रो त्सृजति द्वादश कृत्वः शस्त्वा द्वादश विधा वाइ
मे प्राणाः सप्त शीर्षण्या द्वौ स्तन्यौ त्रयो वाचोत्र वै प्राणा आयंते त्र
संस्क्रियंते तस्मादेना मत्रो त्सृजतींद्राग्नी युवं सु न इत्यैंद्राग्ना ऊरू
उर्वष्ठीवे प्रतिष्ठे ताः षट्पदा भवंति प्रतिष्ठाया एव द्विप्रतिष्ठौ वै पुरु
षश्चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्र
तिष्ठापयति द्वितीया सप्तपदा भवति तां गायत्रीं चानुष्टुभं च करोति

Indira Gandhi National
Centre for the Arts

ब्रह्म वै गायत्री वागनुष्टुप्ब्रह्मणैव तद्वाचं संदधाति त्रिष्टुभमंत
तः शंसति वीर्यं वै त्रिष्टुप्वीर्येणैव तत्सम्पन्नः परिगच्छति तस्मात्सश
वो वीर्यमनूपतिष्ठंते द्वंद्वं यंतां चैवाभ्युत्थानं च ॥ २५ ॥ प्र वो महे मंदमा
नायांधस इत्यैंद्रे निष्केवल्ये निविदं दधाति प्रत्यक्षाध्येव तदात्म
न्वीर्यं धत्ते ता स्त्रिष्टुप्जगत्यो भवंति तदाहुरथ कस्मात्त्रिष्टुप्जग
तीषु निविदं दधातीति न ह वा एतस्याह्न एकं छंदो निविदं धारन
विद्याचेति तस्मात्त्रिष्टुप्जगतीषु निविदं दधाति तदेतदह स्त्रिनिवि
त्कं विद्याद्दशो निविद्वालखिल्यानि विंनिविदेव निविदेवमेनं त्रिनिवि
त्कं विद्याद्रथ सूक्तेवनेन वायोन्यधायि चार्कन्योजा तएव प्राथमोम १८

नस्वानिति तयोरस्त्यन्ने समस्य यद्सन्मनीषा इत्यन्नाद्यस्यावरु
ध्या अथावयन मेते अंतरे ऐंद्रीणां दशतीनां त्रिष्टुप्जगतीनां बृ
हतीसंपन्नानां यावतीरावपंते तावंत्यूर्ध्वमायुषो वर्षाणि जीवंत्ये
प तेन है वा वनैनाथुराप्यते प्रजां मे पशवोर्जयं निति त्वेवं सज्जनीय
मनुशंसति तार्क्ष्यं शंसति स्वस्त्ययनं वै तार्क्ष्यः स्वस्तितायै स्वस्त्य
यनमेव तत्कुरुत एकपदां शंसत्येक धेदं सर्वमस्तानीत्यं यथो सर्वो छं
दस्कृतिमा प्रवानीनीद्रं विश्वा अवीवृधं निति पदानुषंगास्ताः सप्ता
नुषजंति सप्त वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधात्यष्टमीनानुष
जति वागष्टमी नेन्मे वाक्प्राणैरनुषक्ता सदिति तस्मादु सा वाकूस

Indira Gandhi National
Centre for the Arts

आर०
१९

आ० सं०

मानायतनोप्राणैः सत्यनतुषक्ता विराजः शंसत्येनं वै विराजोना
द्यस्यावरुध्यै वासिष्ठेन परिदधाति वसिष्ठो सानीत्येष स्तोमोम
हउग्राय वाहइति महद्वत्या रूपसमृद्धया धुरीवात्योनवाजयं
नधायीत्यं तो वै धूरं त एतदहरेतस्याह्नो रूपमिंद्रत्वायमर्क
ईट्टेवसूनामित्यर्कवत्या रूपसमृद्धया दिवी वद्याम धिनःश्रो
मतंधा इतियत्रह क्वचब्रह्मण्यावागुद्यते तद्वास्य कीर्त्तिर्भव
तियत्रैवं विद्वानेतया परिदधाति तस्मादेवं विद्वानेतयैव परि
दध्यात्॥२१॥ तत्सवितुर्वृणीमहे द्यानोदेवसवितरिति वैश्व
देवस्य प्रतिपदनुचरावेकाह्निकौ रूपसमृद्धौ बहु वा एतस्मिन १९

हनि किंच किंच वारणं क्रियते शांत्या एवं शांतिर्वै प्रतिष्ठैकाहः शां
त्यामेव तत्प्रतिष्ठायामंततः प्रतिष्ठंति प्रतितिष्ठति य एवं वेद येषां
चैवं विद्वानेतद्धोता शंसति नद्देवस्य सवितुर्वार्यं महदिति सावि
त्रमंतो वै महदेत एतदहरेतस्याह्नो रूपं कतरा पूर्वा कतरापरा योरि
परा ४
ती — ति द्यावापृथिवीयं समानोदर्कं समानोदर्कं वा एतदहरेतस्याह्नो ह
रूपमनश्वो जातो अनभीशुरु — इत्यार्भवं रथस्त्रिचक्र इति यद्वे कथ्य
तत्रिवंत्रदं तो वै त्रिवदं त एतदहरेतस्याह्नो रूपमस्य वामस्य पलि
तस्य होतुरिति वैश्वदेवं बहुरूपं बहुरूपं वा एतदहरेतस्याह्नो रूपं
गोरीर्मिमाय सलिलानि तक्षत्येति तैतैंदं तं मानो भद्राः क्रतवो यंतु

Indira Gandhi National
Centre for the Arts

विश्वतइतिवैश्वदेवंनिविद्धानमैकाहिकंरूपसमृद्धंवहुवाएत
स्मीन्नहनिकिंचकिंचवारुणंक्रीयतेशांत्याएवशांतिर्वैप्रतिष्ठो
कर्हःशांत्यामेवतत्प्रतिष्ठायामैततःप्रतितिष्ठतिंयएवंवेदयेषांचै प्रतिष्ठा?
वंविद्वानेतद्धोताशंसतिवैश्वानरायधिषणामृतावृधइत्याग्निमा
रुतस्यप्रतिपदंतोवैधिषणंतेएतदहरेतस्याह्नोरूपंप्रयज्यवो
मरुतोभ्राजदृष्टयइतिमारुतंसमानोदर्कंसमानोदर्कंवाएतद
हरेतस्याह्नोरूपंजातवेदसेसुनवामसोममितिंजातवेदस्यांपुर
स्तात्सूक्तस्यशंसतिस्वस्त्ययनंवैजातवेदस्यास्वस्तितायैस्वस्त्य
यनमेवतत्कुरुतइमंस्तोमममर्हतेजातवेदसइतिजातवेदस्यंस २०

मानोदर्कंसमानोदर्कंवाएतदहरेतस्याह्नोरूपमह्नोरूपं।।२२
।। ।।इतिप्रथमारण्यकेपंचमोध्यायः।। ।।इतिप्रथमारण्य
कंसमाप्तं एषपंथाएतत्कर्म तत्सवितुर्वृणीमहे द्यानोदेव
सवितरिति प्रवोमहेमंदमानायांधसइति वशंशंसतिति गा
यत्रीत्र्चाशीतिंशंसति अथातोदक्षिणपक्षः अथसूददो
हाः तानदेनविहरतिप्राणोवैनदः तदिदासभुवनेषुज्येष्ठमि
तिप्रतिपद्यतेयद्वैज्येष्ठंतदितिप्रतिपद्यते तानदेनविहरति
पुरुषोवैनदः तदिदासभुवनेषुज्येष्ठमितिप्रतिपद्यतएतद्वा
वभुवनेषुज्येष्ठं तदितिप्रतिपद्यते तदाहुःकेवस्याह्नःप्रति

Indira Gandhi National
Centre for the Arts

पदेति हिंकारेणैव दहः प्रतिपद्येतेत्याहुः अरत्निमात्र उपरिभू
मेः प्रेखस्यादित्याहुः तदाहुः किंप्रेंखस्य प्रेंखत्वमिति असत्त्रु
मेजरितः साभिवेगः सत्यध्वतमिति शंसति आत्वारथं यथो
तये वायवायाहि दर्शत गायत्रं उगं कुर्यादित्याहुः अग्निं नरो
दीधितिभिररण्योरित्यन्नाद्यकामः अथ महाव्रतं अथ महा
व्रतं चत्वारि आत्वारथं चत्वारि हिंकारेणाष्टौ अथ सूददोह
स्त्रयः वंशात्रयः अथ महाव्रतं प्रथमं तदिति प्रवो महे द्वौ एष पं
था एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्यायं
न्पूर्वे येऽत्यायंस्ते पराबभूवुस्तदुक्तमृषिणा प्रजा ह तिस्रो अत्यायं २१

न्या मीयु न्यौ अर्कमभितो

निविश्र इति बृहद्ध तस्थौ भुवनेष्वंतः पवमानो हरित आ विवेशेति प्रजा ह
तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्ता
नीमानि वयांसि वंगावगधाश्चेरपादान्यन्या अर्कमभितो विविश्र इ
ति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध तस्थौ भुवने
ष्वंतरित्यद उ एव बृहद्भुवनेष्वंतरसावादित्यः पवमानो हरित आ वि
वेशेति वायुरेव पवमानो दिशो हरित आविष्टः ॥१॥ उक्थमुक्थमि
ति वै प्रजा वदंति तदिदमेवोक्थमियमेव पृथिवी तो हीदं सर्वमुत्ति
ष्ठति यदिदं किंचेतस्याग्निरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुतेंत
रिक्षमेवोक्थमंतरिक्षं वा अनुपतंत्यंतरिक्षमनुधावयंतितस्य

Indira Gandhi National
Centre for the Arts

आर० २२

वायुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेसावेवद्यौरुक्थमम्रुतःप्र
दानाद्धीदंसर्वमुत्तिष्ठतियदिदंकिंचेतस्यासावादित्योर्कोनमशीतयो
न्नेनहीदंसर्वमश्नुतइत्यधिदैवतमथाध्यात्मंपुरुषएवोक्थमयमे
वमहान्प्रजापतिरहमुक्थमस्मीतिविद्यात्तस्यमुखमेवोक्थंयथा
पृथिवीतथातस्यवागर्कोनमशीतयोन्निनहीदंसर्वमश्नुतेनासिके
एवोक्थंयथांतरिक्षंतथातस्यप्राणोर्कोन्नमशीतयोन्ननहीदंसर्व
मश्नुतेतदेतद्भ्रुध्नस्यविष्टपंयदेतंनासिकायैविनतमिवललाटमेवो
क्थंयथाद्यौस्तथातस्यचक्षुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते
समानमशीतयोध्यात्मंचाधिदैवतंचांनमेवान्नेनहीमानिसर्वाणि २२

भूतानिसमनंतीउअंनेनेमंलोकंयजत्यन्नेनामुंतस्मात्समानमशी
तयोध्यात्मंचाधिदैवतंचान्नमेवतदिदमन्नादमिथुमेवपृथिवीतो म-ल २
हीदंसर्वमुत्तिष्ठतियदिदंकिंच यद्वकिंचेदंप्रेत्तादितदसौसर्वम
त्तियदुकिंचातःप्रैतीउतदियंसर्वमत्तिसेयमित्याद्यौत्र्यत्ताहवाअ
द्योभवतिनतस्येशेयंनाद्याद्यद्वैनं नाद्युः॥२॥अथातोरेतसःसृष्टिः
प्रजापतेरेतोदेवादेवानांरेतोवर्षंवर्षस्यरेतओषधयओषधीनांरेतो
ल अन्नमन्नस्यरेतोरेतोरेतसोरेतःप्रजाःप्रजानांरेतोहृदयंहृदयस्यरेतोम
नोमनसोरेतोवाग्वाचोरेतःकर्म॥ तदिदंकर्मकृतमयंपुरुषोब्रह्मणो
लोकःसद्द्रामयोयद्धीरामयस्तस्माद्धिरण्मयोहिरण्मयोहवाअमु

Indira Gandhi National
Centre for the Arts

आर॰
२३

ष्मिँल्लोके संभवति हिरण्मयः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद ॥ ३ ॥
तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं
पुरुषं तस्मात्प्रपदे तस्मात्प्रपदे इत्याचक्षते शफाः खुरा इत्यन्येषां प
शूनां तदूर्ध्वमुदसर्पत्ता ऊरू अभवतामुरुं ग्रे हीत्यब्रवीत्तदुदरम णी
भवदुर्वेव मे कुर्वित्यब्रवीत्तदुरो भवदुदरं ब्रह्मेति शार्कराक्ष्या उपास्य
ते हृदयं ब्रह्मेत्यारुणयो ब्रह्माहैव ता ३ ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्र
यत यच्छिरोऽश्रयत तच्छिरोऽभवत्तच्छिरसः शिरस्त्वं ता एताः शीर्षञ्छ्रियः श्रि
ताश्चक्षुः श्रोत्रं मनो वाक्प्राणः श्रयन्तेऽस्मिञ्छ्रियो य एवमेतच्छिरसः
शिरस्त्वं वेद ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हं २३

ता अस्माच्छरीरादुत्क्रामामेतद्यस्मिन्न उत्क्रान्त इदं शरीरं पत्स्यति तदुक्थं
भविष्यतीति वागुदक्रामदवदन्नश्नन्पिबन्नास्तैव चक्षुरुदक्रामदप
श्यन्नश्नन्पिबन्नास्तैव श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव
मन उदक्रामन्मीलित इवाश्नन्पिबन्नास्तैव प्राण उदक्रामत्तत्प्राण
उत्क्रान्ते पद्यत तदशीर्यताशारीती ३ तच्छरीरमभवत्तच्छरीरस्य श
रीरत्वं शीर्यते ह वा अस्य द्विषन्पाप्मा भ्रातृव्यः परास्य द्विषन्पाप्मा
भ्रातृव्यो भवति य एवं वेद ता अहिंसन्तैवाहमुक्थमस्म्यहमुक्थम
स्मीति ता अब्रुवन्हन्तेदं पुनः शरीरं प्रविशामेतद्यस्मिन्नः प्रपन्न इ
दं शरीरमुत्थास्यति तदुक्थं भविष्यतीति वाक्प्राविशदशयदेव

Indira Gandhi National
Centre for the Arts

चक्षुःप्राविशद्दशायदेवंश्रोत्रंप्राविशद्दशायदेवंमनःप्राविशद्दश
यदेवंप्राणःप्राविशत्तस्मात्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभवत्तदेतदुक्थं
उँप्राणएवप्राणउक्थमित्येवविद्यात्तंदेवाअब्रुवन्त्वमुक्थमसित्वमि
दंसर्वमसितववयंस्मस्त्वमस्माकमसीतितदप्येतदृषिणोक्तंत्व
मस्माकंतववस्मसीति॥४॥तंदेवाःप्राणयंतसप्रणीतःप्रातायत
प्रातायीतीउंतस्मात्प्रातरभवत्समागादितीउँ॥तत्सायमभवद्दहरेव
प्राणोरात्रिरपानोवागग्निश्चक्षुरसावादित्यश्चंद्रमामनोदिशःश्रो
त्रंसएषप्रहितांसंयोगोध्यात्ममिमादेवताअदउआधिदैव
तमित्येतत्तदुक्तंभवत्येतद्धस्मवैतद्विद्वानाहहिरण्यदन्बैदोनन २४

स्येशेयंमह्यंनदद्युरितिप्रहितांवाअहमध्यात्मंसंयोगंनिवि
ष्टंवेदैतद्धतदनीशानानिहवाअस्मैभूतानिबलिंहरंतियएवं
वेदैतत्सत्यंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यस्तदेत
त्रिवृत्त्रिवृदिववैचक्षुःशुक्लंकृष्णंकनीनिकेतिसयदिहवाअपि
मृषावदतिसत्यंहैवास्योदितंभवतियएवमेतत्सत्यस्यसत्य
त्वंवेद॥५॥तस्यवाक्तंतिर्नामानिदामानितदस्येदंवाचातंत्या
नामभिर्दामभिःसर्वंसितंसर्वंहीदंनामानीउँसर्वंवाचाभिवद
तिवहंतिहवाएनंतंतिसंबद्धायएवंवेदतस्योष्णिग्लोमानित्वग्गा
यत्रीत्रिष्टुम्मांसमनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृ

Indira Gandhi National
Centre for the Arts

परि०संख्या २०१०८

हतीस च्छंदोभिश्छंनो य छंदोभिश्छंनस्तस्माच्छंदांसीत्याच
क्षते छादयंति ह्वा एनं छंदांसि पापात्कर्मणो यस्यां कस्यांचि
द्दिशि कामयतै य एवमेतच्छंदसां छंदस्त्वं वेद तदुक्तमृषिणाप
श्यं गोपामित्येष वै गोपा एष हीदं सर्वं गोपायत्य निपद्यमान
मिति न ह्येष कदाचन संविशत्या च परा च पथिभिश्चरंतमित्या
च ह्येष परा च पथिभिश्चरति स सध्रीचीः स विषूचीर्वसान इति
सध्रीचीश्च ह्येष विषूचीश्च वस्त आ वरीवर्त्ति भुव
नेष्वंतरित्येष ह्यंतर्भुवनेष्वावरीवर्त्यथो आवृतासो वतासो न
कर्तृभिरिति स वै हीदं प्राणेनावृतं सोयमाकाशः प्राणेन बृहत्या २५

विष्टब्धस्तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्ध एवं सर्वा
णि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं वि
द्यात् ॥ ६ ॥ अथातो विभूतयोस्य पुरुषस्यैतस्य वा वाचस्पृष्टैव पृ
थिवी चाग्निश्चास्या मोषधयो जायंतेग्निरेना स्वदयतीदमा ह
रतेदमा हरतेत्येवमेतौ वाचं पितरं परिचरतः पृथिवी चाग्निश्च
यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य ता
वल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च य ए
वमेतां वाचो विभूतिं वेद प्राणेन सृष्टावंतरिक्षं च वायुश्चांत
रिक्षं वा अनुचरंत्यंतरिक्षमनुशृण्वंति वायुरस्मै पुण्यं गंध

Indira Gandhi National
Centre for the Arts

मावहत्येवमेतौप्राणंपितरंपरिचरतौंतरिक्षंचवायुश्चयावदन्वंतरि
क्षंयावदनुवायुस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेंया
वदेतयोर्नजीर्यतेंतरिक्षस्यचवायोश्चयएवमेतौप्राणस्यविभूतिं
वेदचक्षुषास्तृष्टौद्यौश्चादित्यश्चद्यौर्हास्मैवृष्टिमन्नाद्यंसंप्रयछत्या
दित्योस्यज्योतिःप्रकाशंकरोत्येवमेतौचक्षुःपितरंपरिचरतोद्यौश्चा
दित्यश्चयावदनुद्यौर्यावदन्वादित्यस्तावानस्यलोकोभवतिनास्य
तावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेदिवश्चादित्यस्यचयएवमे
तौचक्षुषोविभूतिंवेदश्रोत्रेणसृष्टादिशश्चचंद्रमाश्चदिग्भ्योहै
नमायंतीउ दिग्भ्योविश्टणोतिचंद्रमाअस्मैपूर्वपक्षापरपक्षा २६

न्विचिनोतिंपुण्यायकर्मणएवमेतेश्रोत्रंपितरंपरिचरंतिदिशश्चचं
द्रमाश्चयावदनुदिशोयावदनुचंद्रमास्तावानस्यलोकोभवतिनास्य
तावल्लोकोजीर्यतेंयावदेतेषांनजीर्यतेदिशांचचंद्रमसश्चयएव
मेतौश्रोत्रस्यविभूतिंवेदमनसासृष्टाआपश्चवरुणश्चापोहास्मैश्र
द्धांसंनमंतेपुण्यायकर्मणेवरुणोस्यप्रजांधर्मेणदाधारैवमेतेमनः
पितरंपरिचरंत्यापश्चवरुणश्चयावदन्वापोयावदनुवरुणस्तावा
नस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेयावदेतेषांनजीर्यतेपा
चवरुणस्यचयएवमेतौमनसोविभूतिंवेद ७। आपाः३इत्यापइ
तिनदिदमापएवेदंवैमूलमदस्तूलमयंपितैतेपुत्रोयत्रहक्वचपुत्र

Indira Gandhi National
Centre for the Arts

स्यनस्मितुर्यत्रवापितुस्तदापुत्रस्येत्येतन्नदुक्तंभवत्येतद्धस्मैवैतद्विद्वा
नाहमहिदासऐतरेयआहमांदेवेभ्योवेदाओमहद्देवान्वेदेतःप्रदाना
ह्येतइतःसंभृताइतिसएषगिरिश्चक्षुःश्रोत्रंमनोवाक्प्राणस्तंब्रह्म
गिरिरित्याचक्षतेगिरतिहवैद्विषंतंपाप्मानंभ्रातृव्यंपरास्यद्विषन्पा
प्माभ्रातृव्योभवतियएवंवेदसएषोसुःसएषप्राणःसएषभूतिश्चा
भूतिश्चतंभूतिरितिदेवाउपासांचक्रिरेतेबभूवुस्तस्माद्धाप्येतर्हि
सुप्तोभूर्भू रित्येवप्रश्वसित्यभूतिरित्यसुरास्तेहपराबभूवुर्भवत्या
त्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदसएषमृत्युश्चैवा
मृतंचतदुक्तमृषिणापाङ्प्राङेतिस्वधयागृभीतइत्यपानेनह्ययंय २७

तःप्राणोनपराङ्भवत्यमर्त्योमर्त्येनासयोनिरित्येतेनहीदंसर्वंस
योनिमर्त्यानिहीमानिशरीराणि ३। अमृतैषादेवताताशश्वंता
विषूचीनावियंतान्यन्यंचिकुर्ननिचिकुरन्यमितिनिचिन्वंति
हैवेमानिशरीराणि।ॐअमृतैवैषादेवता मृतोहवाअमुष्मिंलो
केसंभवत्यमृतःसर्वेभ्योभूतेभ्योदृदृशेयएवंवेदयएवंवेद॥८॥
इतिद्वितीयारण्यकेप्रथमोध्यायः॥ ॥एषइमंलोकमभ्यार्चत्पुरु
षरूपेणयएषतपतिप्राणोवावतदभ्यार्चत्प्राणोह्येषयएषतपति
तंशतंवर्षाण्यभ्यार्चत्तस्माच्छतंवर्षाणिपुरुषायुषोभवंतितंयच्छ
तंवर्षाण्यभ्यार्चत्तस्माच्छतर्चिनस्तस्माच्छतर्चिनइत्याचक्षतएतमे

Indira Gandhi National
Centre for the Arts

वसंतंसइदंसर्वमध्यतोदधेयदिदंकिंचसयदिदंसर्वं मध्य
तोदधेयदिदंकिंचतस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतं
एतमेवसतंप्राणोवैगृत्सोपानोमदःसयत्प्राणोगृत्सोपानोमद
स्तस्माद्गृत्समदस्तस्माद्गृत्समदइत्याचक्षतएतमेवसंतंतस्येदंवि
श्वंमित्रमासीद्यदिदंकिंचतद्यदस्येदंविश्वंमित्रमासीद्यदिदंकिं
चतस्माद्विश्वामित्रस्तस्माद्विश्वामित्रइत्याचक्षतएतमेवसंतं
तंदेवा अब्रुवन्नयंवैनः सर्वेषांवामइतितंयद्देवाअब्रुवन्नयंवैनः
सर्वेषांवामइतितस्माद्वामदेवस्तस्माद्वामदेवइत्याचक्षतएतमे
वसंतंसइदंसर्वंपाप्मनोत्रायतयदिदंकिंचसयदिदंसर्वंपाप्मनो

त्रायतयदिदंकिंचतस्मादत्रयस्तस्मादत्रयइत्याचक्षतएतमेवसं
तं ॥९॥ एषउएवबिभ्रद्वाजःप्रजावैवाजस्ताएषबिभर्त्तियद्बिभर्त्ति
तस्माद्भरद्वाजस्तस्माद्भरद्वाजइत्याचक्षतएतमेवसंतंतंदेवाअब्रु
वन्नयंवैनःसर्वेषांवसिष्ठइतितंयद्देवाअब्रुवन्नयंवैनःसर्वेषांव
सिष्ठइतितस्माद्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतएतमेवसंतंसइदं
सर्वमभिप्रागाद्यदिदंकिंचसयदिदंसर्वमभिप्रागाद्यदिदंकिंचत
स्मात्प्रगाथास्तस्मात्प्रगाथाइत्याचक्षतएतमेवसंतंसइदंसर्वम
भ्यपवयतयदिदंकिंचसयदिदंसर्वमभ्यपवयतयदिदंकिंचत
स्मात्पावमान्यस्तस्मात्पावमान्यइत्याचक्षतएतमेवसंतंसोऽब्रवीद
त्या ।

Indira Gandhi National
Centre for the Arts

हमिदंसर्वमसानियच्चक्षुद्रंयच्चमहदितितेक्षुद्रसूक्ताश्चाभव
न्महासूक्ताश्चेतस्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्तादृत्याचक्षत
एतमेवसंतंसूक्तं ब्रुतावोचतेतितत्सूक्तमभवत्तस्मात्सूक्तंतस्मा
त्सूक्तमित्याचक्षतएतमेवसंतमेषवाऋगेषह्येभ्यःसर्वेभ्यो
भूतेभ्योर्चतसयदेभ्यःसर्वेभ्योभूतेभ्योर्चततस्मादृक्तस्मादृगि
त्याचक्षतएतमेवसंतमेषवाअर्धर्चएषह्येभ्यःसर्वेभ्योर्द्धेभ्यो
र्चतेसयदेभ्यःसर्वेभ्योर्द्धेभ्योर्चततस्मादर्धर्चस्तस्मादर्धर्चइत्या
चक्षतएतमेवसंतमेषवैपदमेषहीमानिसर्वाणिभूतानिपादि
सयदिमानिसर्वाणिभूतानिपादितस्मात्पदंतस्मात्पदमित्याच

क्षतएतमेवसंतमेषवाअक्षरमेषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरति
नचैनमतिक्षरंतिसयदेभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्ष
रंतितस्मादक्षरंतस्मादक्षरमित्याचक्षतएतमेवसंतंतावाएताः
सर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋ
चइत्येवविद्यात्॥१०॥ विश्वामित्रंह्येतदहःशंसिष्यंतमिंद्रउपनिष
ससादसहान्नमित्यभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्य
प्रियंधामोपयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपागाः सयाऋ
षेद्वितीयंशंसेतिसहान्नमित्येवाभिव्याहृत्यबृहतीसहस्रंशशंस
तेनेंद्रस्यप्रियंधामोपयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपा

Indira Gandhi National
Centre for the Arts

गाः सवा ऋषे तृतीयं शंसेति स ह्यो नमित्येवाभिव्याहृत्य बृहतीस
हस्रं शशंस तेनेंद्रस्य प्रियं धामोपेयाय तमिंद्र उवाच ऋषे प्रियं
वै मे धामोपागा वरं ते ददामीति स होवाच त्वामेव जानीयामिति त
मिंद्र उवाच प्राणो वा अहमस्म्यृषे प्राणस्त्वं प्राणः सर्वाणि भूता
नि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टो स्मि
तस्य मे न्नं मित्रं दक्षिणं तद्वैश्वामित्रमेष तपन्नेवास्मीति होवा
च ॥ ११ ॥ तद्वा इदं बृहतीसहस्रं संपन्नं तस्य यानि व्यंजनानि त
च्छरीरं यो घोषः स आत्मा य ऊष्माणः स प्राण एतद्ध स्म वै तद्विद्वा
न्वसिष्ठो वसिष्ठो बभूव तत एतं नामधेयं लेभ एतदु हैवेंद्रो विश्वा ३०

मित्राय प्रोवाचैतदु हैवेंद्रो भरद्वाजाय प्रोवाच तस्मात्स तेन बंधु
नायज्ञेषु हूयते तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृह
तीसहस्रस्य संपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवंति
तावंति शतसंवत्सरस्याह्नां सहस्राणि भवंति व्यंजनैरेव रात्रीरा
प्नुवंति स्वरैरहानि तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृ
हतीसहस्रस्य संपन्नस्य परस्तात्प्रज्ञामयो देवतामयो ब्रह्ममयो मृ
तमयः संभूय देवता अप्येति य एवं वेद तद्यो हं सो सौ यो सौ सो हं तदु
क्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेत्येतदु हैवोपेक्षेतोपेक्षेत ॥ १२ ॥
॥ ॥ इति द्वितीयारण्यके द्वितीयो ध्यायः ॥ ॥ यो ह वा आत्मानं पंच

Indira Gandhi National
Centre for the Arts

आर०
३१ विधमुक्थंवेदयस्मादिदंसर्वमुत्तिष्ठतिससंप्रतिवित्पृथिवीवायुरा
काशआपोज्योतींषीत्येषवाआत्मोक्थंपंचविधमेतस्माद्धीदंसर्व
मुत्तिष्ठत्येतमेवाप्येत्ययनंहवैसमानानांभवतियएवंवेदतस्मिन्यो
न्नंचान्नादंचवेदाहास्मिन्नन्नादोजायतेभवत्यस्यान्नमापश्चपृथिवी
चान्नमेतन्मयानिहीमानिभवंतिज्योतिश्चवायुश्चान्नादमेताभ्यांही
दंसर्वमन्नमत्त्यावपनमाकाशआकाशेहीदंसर्वसमोप्यतआवपनं
हवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नं
नादोजायतेभवत्यस्यान्नमोषधिवनस्पतयोन्नंप्राणभृतोन्नादमो
षधिवनस्पतीन्हिप्राणभृतोदंतितेषांयउभयतोदंताःपुरुषस्यानु ३१

विधांविहितास्तेन्नादाअन्नमितरेपशवस्तस्मात्तइतरान्यभूनधीव
चरंत्यधीवह्यन्नेन्नादोभवत्यधीवहसमानानांजायतेयएवंवेद॥१३
॥तस्ययआत्मानमाविस्तरांवेदाश्नुतेहाविर्भूयओषधिवनस्पतयो
यच्चकिंचप्राणभृत्सआत्मानमाविस्तरांवेदौषधिवनस्पतिषुहिरसो
दृश्यतेचित्तंप्राणभृत्सुप्राणभृत्सुत्वेवाविस्तरामात्मातेषुहिरसोपिदृ मा
श्यतेनचित्तमितरेषुपुरुषेत्वेवाविस्तरामात्मासहिप्रज्ञानेनसंपन्न
तमोविज्ञातंवदतिविज्ञातंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्ये
नामृतमीप्सत्येवंसंपन्नोथेतरेषांपशूनामशनापिपासेएवाभिवि
ज्ञानंनविज्ञातंवदंतिनविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकौ

Indira Gandhi National
Centre for the Arts

आर०
३२

तएनावंतोभवंतियथाप्रज्ञंहिसंभवाः॥१४॥सएषपुरुषःसमुद्रःस
र्वंलोकमतियद्धकिंचाश्नुतेत्येनंमन्यतेयद्यंतरिक्षलोकमश्नुते
त्येनंमन्यतेयद्यमुंलोकमश्नुवीतात्येवेनंमन्येतसएषपुरुषःपं
चविधस्तस्ययदुष्णंतज्ज्योतिर्यानिखानिसआकाशोथयल्लोहि
तंश्लेष्मरितस्ताआपोयच्छरीरंसापृथिवीयःप्राणःसवायुःसए
षवायुःपंचविधःप्राणोपानोव्यानउदानःसमानस्ताएतादेवताःप्रा
णापानयोरेवनिविष्टाश्चक्षुःश्रोत्रंमनोवागितिप्राणस्यह्यन्वपाय
मेताअपियंतिसएषवाचश्चित्तस्योत्तरोत्तरिक्रमोयद्यज्ञःसएषय
ज्ञःपंचविधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमःस ३२

एषयज्ञानांसंपन्नतमोयत्सोमएतस्मिन्ह्येताःपंचविधाअधिगम्यं
तेयस्माक्तवनेभ्यःसैकाविधात्रीणिसवनानियदूर्ध्वंसापंचमी॥
१५॥योहवैयज्ञेयज्ञंवेदाहन्यहर्देवेषुदेवमध्यूल्हंससंप्रतिविद्देषवै
यज्ञेयज्ञोहन्यहर्देवेषुदेवोध्यूल्होयदेतन्महदुक्थंतदेनत्पंचविधं
त्रिवृत्पंचदशंसप्तदशमेकविंशंपंचविंशमितिस्तोमतोगायत्रंरथं
तरंबृहद्भद्रंराजानमितिसामतोगायत्र्युष्णिग्बृहतीत्रिष्टुब्द्विपदेति
छंदस्तःशिरोदक्षिणःपक्ष उत्तरःपक्षःपुच्छमात्मेत्याख्यानंपंचकृत्वः
प्रस्तौतिपंचकृत्वउद्गायतिपंचकृत्वःप्रतिहरतिपंचकृत्वउपद्रवतिपंच
कृत्वोनिधनमुपयंतितत्स्तोभसहस्रंभवत्येवंह्येताःपंचविधाअनुश

Indira Gandhi National Centre for the Arts

आर०
३३

स्यंतैयस्त्वाह्रुचाशीतिभ्यःसैकाविधातिस्रस्तच्चाशीतयोयदूर्ध्वं
सापंचमीतदेतत्सहस्रंतत्सर्वंतानिदशदशेतिवैसर्वमेतावतीहि
संख्यादशदशतस्तच्छतंदशशतानितत्सहस्रंतत्सर्वंतानित्रीणि
छंदांसिभवंतित्रेधाविहितंवाइदमन्नमशनंपानंखादस्तदेतेरा
प्नोति॥१६॥तद्वाइदंबृहतीसहस्रंसंपन्नंतद्वैतदेकेनानाछंदसां
सहस्रंप्रतिजानतेकिमन्यत्सदन्यद्ब्रूयामेतित्रिष्टुप्सहस्रमेके
जगतीसहस्रमेकेनुष्टुप्सहस्रमेकेतदुक्तमृषिणानुष्टुभमनुचर्च्
र्यमाणमिंद्रंनिचिक्युःकवयोमनीषेतिवाचिवैतदेंद्रंप्राणंन्यचायंति
त्येतत्तदुक्तंभवतिसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोरीश्वरो ३३

हंतुपुरायुषःप्रैतोरितिहस्माहाकृत्स्नोह्येषआत्मायद्वागभिहिप्राणे
नमनसेस्यमानोवाचानानुभवतिबृहतीमभिसंपादयेदेषवैकृत्स्न
आत्मायद्बृहतीसोयमात्मासर्वतःशरीरैःपरिवृतस्तद्यथायमात्मा
सर्वतःशरीरैःपरिवृतएवमेवबृहतीसर्वतश्छंदोभिःपरिवृतामध्यं
ह्येषामंगानामात्मामध्यंछंदसांबृहतीसहेश्वरोयशस्वीकल्याण
कीर्त्तिर्भवितोरीश्वरोहंतुपुरायुषःप्रैतोरितिहस्माहकृत्स्नोह्येषआ
त्मायद्बृहतीतस्माद्बृहतीमेवाभिसंपादयेत्॥१७॥तद्वाइदंबृहतीस
हस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यैकादशानुष्टुभां
शतानिभवंतिपंचविंशतिश्चानुष्टुभआत्तैवभूयसाकनीयस्तदुक्तं

Indira Gandhi National
Centre for the Arts

आ॰र॰
३४

ऋषिणावाचमष्टापदीमहमित्यष्टौहिचतुरक्षराणिभवंतिनवस्र
क्तिमितिबृहतीसंपद्यमानानवस्रक्तिरृतस्पृशमितिसत्यंवैवागृ
चास्पृष्टेंद्रासरितन्वंममइतितद्यदेवैतद्बृहतीसहस्रमनुष्टुप्सं
पन्नंभवतितस्मात्तदैंद्रात्प्राणाद्बृहत्यैवाचमनुष्टुभंतन्वंसंनिर्मि
मीतेसवाएषवाचःपरमोविकारोयदेतन्महदुक्थंतदेतत्पंचवि
धंमितममितंस्वरःसत्यानृतेऋग्गाथाकुंब्यातन्मितंयजुर्निग
दोवृथावाक्तदमितंसामाथोयःकश्चगेष्णःसस्वरओमितिसत्यंने
त्यनृतंतदेतत्पुष्पंफलंवाचोयत्सत्यंसहेश्वरोयशस्वीकल्या
णकीर्तिर्भवितोःपुष्पंहिफलंवाचःसत्यंवदत्यथैतन्मूलंवाचो ३४

यदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्ततएवमेवानृतंव
दन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्ततेतस्मादनृतंन
वदेद्दयेतत्वेनेनपराग्वाएतद्रिक्तमक्षरंयदेतदो३मितितद्यत्किंचो
मित्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिंच्यादात्मानंसका
मेभ्योनालंस्यादथैतत्पूर्णमभ्यात्मंयन्नेतिसयत्सर्वंनेतिब्रूया
त्पापिकास्यकीर्तिर्जायेतसैनंतत्रैवहन्यात्तस्मात्कालएवदद्या
त्कालेनदद्यात्तत्सत्यानृतेमिथुनीकरोतितयोर्मिथुनात्प्रजाय
तेभूयान्भवतियोवैतांवाचंवेदयस्याएषविकारःससंप्रतिविद
कारोवैसर्वावाक्सैषास्पर्शोष्मभिर्व्यज्यमानाबह्वीनानारूपाभव

Indira Gandhi National
Centre for the Arts

आर०
३५

त्तितस्येयदुपांशुसप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तत्तिरइवतिर
इवह्यशरीरमशरीरोहिप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तदाविराविर्
हिंशरीरं॥१८॥तद्वाइदंबृहतीसहस्रंसंपन्नंतद्यशःसइंद्रःसभू
तानामधिपतिःसयएवमेतमिंद्रंभूतानामधिपतिंवेदविस्रसाहै
वास्माल्लोकात्प्रैतीतिहस्माहमहिदासऐतरेयःप्रेत्येंद्रोभूत्वैषुलो
केषुराजतीतिदाहुर्यदनेनरूपेणामुंलोकमभिसंभवतीउ३अथके
नरूपेणेमंलोकमाभवतीउ३तद्यदेतत्स्त्रियांलोहितंभवत्यग्नेस्तद्रू
पंतस्मात्तस्मान्नबीभत्सेताथयदेतत्पुरुषेरेतोभवत्यादित्यस्य
तद्रूपंतस्मात्तस्मान्नबीभत्सेतसोयमात्मेममात्मानममुष्माआत्म ३५

नेसंप्रयच्छत्यसावात्मामुमात्मानमिमस्माआत्मनेसंप्रयच्छ
तितावन्योन्यमभिसंभवतोनेनाहरूपेणामुंलोकमभिसंभव
त्यमुनोरूपेणेमंलोकमाभवति १९ तत्रैतेश्लोकाः यदक्षरं
पंचविधंसमेतियुजोयुक्ताअभियत्संवहंति।सत्यस्यसत्यमनु
यत्रयुज्यतेतत्रदेवाःसर्वएकंभवंति।यदक्षरादक्षरमेतियुक्तं
युजोयुक्ताअभियत्संवहंति।सत्यस्यसत्यमनुयत्रयुज्यतेतत्र
देवाःसर्वएकंभवंति।यद्वाचओमितियच्चनेतियच्चास्याःक्रूरंय
दुचोल्बणिस्युः।तद्वियूयाकवयोअन्वविंदन्नामायत्तासमतृप्यं
छ्रुतेधि।यस्मिन्नामासमतृप्यंछ्रुतेधितत्रदेवाःसर्वयुजोभवंति

Indira Gandhi National
Centre for the Arts

२०१०७

आर० ३६

।।तेनपाप्मानमपहत्यब्रह्मणास्वर्गंलोकमप्येतिविद्वान्।नैनंवाचा
स्त्रियंब्रुवन्नैनमस्त्रीपुमान्ब्रुवन्।।पुमांसंनब्रुवन्नैनंवदन्वदतिकश्च
नंअः इतिब्रह्मतत्रागतमहमितितद्वाइदंबृहतीसहस्रंसंपन्नंत
स्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांस
हस्राणिभवंतितावंतिपुरुषायुषोऽह्नांसहस्राणिभवंतिजीवाक्षरे
णैवजीवाहराप्नोतिजीवाह्नाजीवाक्षरमित्यनेनकाममारोध्योदैव
रथस्तस्यवागुद्धिःश्रोत्रेपक्षसीचक्षुषीयुक्तेमनःसंग्रहीतातद
यंप्राणोऽधितिष्ठतितदुक्तमृषिणातेनयातंमनसोजवीयसानिमिष
श्चिज्जवीयसेतिजवीयसेति।२०।।इतिद्वितीयारण्यकेतृतीयोऽध्यायः ३६

Indira Gandhi National Centre for the Arts